# Shyamala Navaratnamalika Stavam

# શ્યામલાનવરત્નમાલિકાસ્તવમ્

## Document Information

Text title : Shyamala Navaratnamalika Stavam

File name : shyAmalAnavaratnamAlikAstavam.itx

Category : devii, nava

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 18, 2020

*sanskritdocuments.org*

# શ્યામલાનવરત્નમાલિકાસ્તવમ્

ધ્યાનશ્લોકૌ -
કચાઞ્ચિતવિપઞ્ચિકાં કુટિલકુન્તલાલઙ્કૃતાં
    કુશેશયનિવેશિનીં કુટિલચિત્તવિદ્વેષિણીમ્ ।
મદાલસગતિપ્રિયાં મનસિજારિરાજ્યશ્રિયં
    મતઙ્ગકુલકન્યકાં મધુરભાષિણીમાશ્રયે ॥

કુન્દમુકુલાગ્રદન્તાં કુઙ્કુમપઙ્કેન લિપ્તકુચભારામ્ ।
આનીલનીલદેહામમ્બામખિલાણ્ડનાયિકાં વન્દે ॥

અથ સ્તોત્રમ્ -
ઓઙ્કારપઞ્જરશુકીમુપનિષદુદ્યાનકેલિકલકણ્ઠીમ્ ।
આગમવિપિનમયૂરીમાર્યામન્તર્વિભાવયે ગૌરીમ્ ॥ ૧॥

દયમાનદીર્ઘનયનાં દેશિકરૂપેણ દર્શિતાભ્યુદયામ્ ।
વામકુચનિહિતવીણાં વરદાં સઙ્ગીતમાતૃકાં વન્દે ॥ ૨॥

શ્યામલિમસૌકુમાર્યાં સૌન્દર્યાનન્દસમ્પદુન્મેષાં
તરુણિમકરુણાપૂરાં મદજલકલ્લોલલોચનાં વન્દે ॥ ૩॥

નખમુખમુખરિતવીણાનાદરસાસ્વાદનવનવોલ્લાસમ્ ।
મુખમમ્બ મોદયતુ માં મુક્તાતાટઙ્કમુગ્ધહસિતં તે ॥ ૪॥

સરિગમપધનિરતાં તાં વીણાસઙ્ક્રાન્તકાન્તહસ્તાન્તામ્ ।
શાન્તાં મૃદુલસ્વાન્તાં કુચભરતાન્તાં નમામિ શિવકાન્તામ્ ॥ ૫॥

અવટુતટઘટિતચૂલીતાડિતતાલીપલાશતાટઙ્કામ્ ।
વીણાવાદનલેશાકમ્પિતશીર્ષાં નમામિ માતઙ્ગીમ્ ॥ ૬॥

વીણારવાનુષઙ્ગં વિકલકચામોદમાધુરીભૃઙ્ગમ્ ।
કરુણાપૂરતરઙ્ગં કલયે માતઙ્ગકન્યકાપાઙ્ગમ્ ॥ ૭॥

મેચકમાસેચનકં મિથ્યાદૃષ્ટાન્તમદ્ધ્યભાગં તે ।
માતસ્તવ સ્વરૂપં મઙ્ગલસઙ્ગીતસૌરભં વન્દે ॥ ૮॥

મણિભઙ્ગમેચકાઙ્ગીં માતઙ્ગીં નૌમિ સિદ્ધમાતઙ્ગીમ્ ।
યૌવનવનસારઙ્ગીં સઙ્ગીતામ્ભોરુહાનુભવભૃઙ્ગીમ્ ॥ ૯॥

નવરત્નમાલ્યમેતદ્રચિતં માતઙ્ગકન્યકાઽઽભરણમ્ ।
યઃ પઠતિ ભક્તિયુક્તસ્સફલસ્સ ભવતિ શિવાકૃપાપાત્રમ્ ॥ ૧૦॥

પ્રપઞ્ચપઞ્ચીકૃતકનિદાનપદપાંસવે ।
વીણાવેણુશુકાલાપપ્રવીણમહસે નમઃ ॥ ૧૧॥

ઇતિ શ્યામલાનવરત્નમાલિકાસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by PSA Easwaran

---

*Shyamala Navaratnamalika Stavam*

pdf was typeset on January 18, 2020

Please send corrections to *sanskrit@cheerful.com*